# अर्थसंग्रहः

राष्ट्रिय संस्कृत संस्थान
नई दिल्ली

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्त्रशो वर्षेभ्य: प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदा:, शास्त्रीयं वाङ्मयम्, इतिहास:, पुराणानि, काव्यानीत्यनेकरचना: विकासंगता:। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविधप्रयासै: प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमा: परम्परा: संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अतएव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविधग्रन्थमाला: संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था: भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठायां प्राप्नुवन् ये च ग्रन्था: अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था: अचिरादेव विद्वत्समाजस्य स्वाध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुन: प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृत: **अर्थसंग्रह:** इति नामक: **मीमांसा शास्त्रीय:** संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थ: सर्वै: यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्य: सर्वेभ्य: संस्थानस्य अधिकारिभ्य: सम्यङ् मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

**–राधावल्लभ: त्रिपाठी**

# अर्थसंग्रहविषयानुक्रमणिका


| विषयः | पृष्ठम् |
|---|---|
| मङ्गलाचरणम् ... ... | १ |
| तत्रारम्भकसूत्रावतरणम् ... | ३ |
| धर्मविचारशास्त्रस्यावश्यकता | ५ |
| धर्मलक्षणप्रश्नः ... ... | ६ |
| वेदस्य धर्मप्रतिपादकत्वम् ... | ८ |
| भावनाविचारः ... ... | १० |
| शाब्दी भावना ... ... | ११ |
| शाब्द्या लौकिकवैदिकभेदौ ... | १२ |
| आर्थीभावनालक्षणम् ... | १९ |
| आर्थीभावनाया अंशत्रयम् ... | २१ |
| वेदलक्षणविचारः ... ... | २७ |
| विधिमीमांसा... ... ... | २८ |
| वाक्यभेददोषपरिहारः ... | २९ |
| गुणविध्यादिभेदाः ... ... | ३० |
| उभयविधित्वम् ... ... | ३० |
| विधिश्चतुर्विधः ... ... | ३२ |
| उत्पत्तिविधिः... ... ... | ३२ |
| यागस्य रूपद्वयम् ... ... | ३४ |
| विनियोगविधिः ... ... | ३५ |
| विधेः श्रुत्यादिषट्प्रमाणानि ... | ३८ |
| श्रुतिनिर्वचनम् ... ... | ३९ |
| विनियोक्त्री श्रुतिस्त्रिधा ... | ४० |
| तृतीयाविभक्तिरूपया उदाहर० | ४१ |
| द्वितीयारूपाया विनियोक्त्र्या उदा-हरणम् ... ... ... | ४१ |
| द्वितीयाविनियोक्त्र्या उदाहरणम् | ४२ |
| सप्तमीविभक्तिविनियोक्त्र्या उदाहरणम् ... ... ... | ४३ |
| अमूर्ताया अपि भावनाङ्गत्वम् | ४४ |
| भावनाया आख्यातवाच्यत्वम् | ४६ |
| लिङ्गनिर्वचनम् ... ... | ४९ |
| वाक्यनिर्वचनम् ... ... | ५२ |
| प्रकृतिविकृतिलक्षणम् ... | ५३ |
| प्रकरणनिरूपणम् ... ... | ५५ |
| प्रकरणद्वैविध्यम् ... ... | ५४ |
| महाप्रकरणम् ... ... | ५५ |
| अवान्तरप्रकरणम् ... ... | ५७ |
| संदंशलक्षणम् ... ... | ५७ |
| स्थाननिरूपणम् ... ... | ६१ |
| पाठसादेश्येन विनियोगः ... | ६१ |
| अनुष्ठानसादेश्येन विनियोगः | ६३ |
| समाख्यानिरूपणम् ... ... | ६६ |
| विनियोगविधिबोधिताङ्गानि ... | ६७ |
| संनिपत्योपकारकाणि ... ... | ६८ |
| आराटुपकारकाणि ... ... | ६८ |
| प्रयोगविधिः ... ... ... | ७० |
| क्रमस्वरूपम् ... ... ... | ७२ |
| श्रुत्यादिषट्प्रमाणानि ... ... | ७३ |
| श्रुतिलक्षणम् ... ... ... | ७३ |
| अर्थक्रमलक्षणम् ... ... | ७६ |


*

**तस्य च करणत्वं न भावनोत्पादकत्वेन, तत्पूर्वमपि तस्याः शब्दे सत्त्वात्। किंतु भावनाज्ञापकत्वेन शब्दभावनाभाव्य-**

---

पुरुषप्रवृत्तिदर्शनेन तस्य वक्ष्यमाणपुरुषप्रवृत्तिनिर्वर्तकत्वेन शब्दभावनाकरणत्वं नानुपपन्नमिति भावः। अन्ये त्वाहुः–विधिशब्दस्य पुरुषप्रवृत्तिरूपार्थभावनाज्ञान-हेतुर्व्यापारस्तद्वाचकशक्तिमत्तया विधिशब्दज्ञानं स एव च तस्य प्रवृत्तिहेतुर्व्यापार इति प्रवर्तनाभिधानीयकं लभते, ज्ञानद्वारेणैव शब्दस्य प्रवृत्तिजनकत्वात् ज्ञान-जनकव्यापारातिरिक्तव्यापारकल्पने मानाभावात्। ज्ञानकरणकश्च व्यापारः, तस्य स्वज्ञानं शक्तिज्ञानं शक्तिविशिष्टस्वज्ञानं च। तत्राद्ययोरन्यतरस्य शब्दभावनात्वम्, तृतीयस्य तु तत्र करणत्वमिति विवेक इति। तस्य च लिङादिज्ञानस्य न शब्दभावनोत्पादकत्वेन तत्करणत्वं संभवति। तस्माल्लिङादिज्ञानात्पूर्वमपि तस्याः शब्दभावनायाः शब्दे विद्यमानत्वेन तदुत्पादकत्वासंभवादित्याह—**तस्य चेत्यादिना**। **ननु** कथं लिङादिज्ञानस्य भावनासाधकत्वेन तत्करणत्वं न स्वीक्रियते? चक्षुरादेस्तत्संनिकर्षस्य वा रूपादिज्ञानसाधकत्वेनैव तत्करणत्वदर्शना-दिति चोदयति—**किंत्विति**। समाधत्ते—**भावनेत्यादिना**। यथा कुठारस्य छिदिक्रियाभाव्यद्वैधीभावनिर्वर्तकत्वेन छिदिभावनाकरणत्वं तथा लिङादिज्ञानस्य शब्दभावनाभाव्यार्थभावनानिर्वर्तकत्वेन शब्दभावनाकरणत्वमिति भावः। तथा चोक्तं कुठारादीनामपि छिदिक्रियाभाव्यद्वैधीभावनिर्वर्तनद्वारेण छिदिभावना-करणत्वदर्शनादिति। किंच रूपादिज्ञानस्य चक्षुःसंनिकर्षादेः प्रागसत्त्वेन तस्य तत्साधकत्वेन तत्करणत्वं, शब्दभावनायास्तु प्रागपि सत्त्वेन लिङादिज्ञानस्य तत्साधकत्वेन तत्करणत्वासंभवेऽपि तद्भाव्यार्थभावनानिर्वर्तकत्वेन तस्य शब्द-भावनाकरणत्वं कुठारवदुपपद्यते। **ननु** कुठारस्य तु छिदिक्रियानिर्वर्तकत्वमपि भवतीति चेत्–सत्यम्; दृष्टान्तस्तु–यथा कुठारस्य छेदननिर्वर्तकत्वेऽपि तस्याफल-त्वेन छिदिक्रियाभाव्यद्वैधीभावफलनिर्वर्तकत्वेनैव तत्करणत्वमिति द्रष्टव्यम्। **ननु** पुरुषो लिङादिज्ञानेन स्वप्रवृत्तिं भावयेदित्युक्ते सर्वेषामेव यागादौ प्रवृत्तिः किं न स्यादित्याशङ्क्य सर्वेषां प्राशस्त्यज्ञानाभावेन न सर्वेषां प्रवृत्त्यापत्तिः, किंतु यस्य पुरुषस्य कर्मप्राशस्त्यज्ञानं भवति तस्यैव तत्फलरागादिना तत्र प्रवृत्तिरित्याशये-